# Ganesha Stotram

# ગણેશસ્તોત્રમ્

## Document Information

Text title : Ganesha Stotram

File name : gaNeshastotramshrIdharasvAmI.itx

Category : ganesha, shrIdharasvAmI, stotra, panchaka

Location : doc_ganesha

Author : Shridharasvami

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# ગણેશસ્તોત્રમ્

(શાર્દૂલવિક્રીડિતં વૃત્તમ્)

વિઘ્નાન્હન્તીતિ લોકે શ્રુતિષુ નિગદિતો યશ્ચ વિઘ્નઘ્ન એકઃ
  વ્યક્તાવ્યક્ત સ્થિતૌ ચ પ્રણવવપુરયં બ્રહ્મરૂપસ્વમાત્રઃ ।
માયાવિદ્યાદિશૂન્યો નિરવધિરમલોઽરૂપતો નિર્ગુણોઽપિ
  ભક્તાનાં મુક્તિહેતો ભવતિ કરુણયા સદ્ગુરુરૂપધારી ॥ ૧॥

સર્વં બ્રહ્મૈવ સાક્ષાચ્છ્રુતિષુ નિગદિતં નેહ નાનાઽસ્તિ કિઞ્ચિત્
  માયા ચૈતન્ય યોગાદ્વ્યવહરતિ યદા કાર્યરૂપપ્રતીતિઃ ।
ચૈતન્યાભાવતો યત્કિમપિ ન ચ ભવેત્સ્યાન્ન માયાઽપિ યસ્માત્
  એકશ્ચૈતન્યરૂપો ગણપતિરથનો તદ્દ્વિતીયં કથઞ્ચિત્ ॥ ૨॥

રજ્જૌ સર્પેઽપિ દૃષ્ટે ન ભુજગ ઇતિ સા કથ્યતે રજ્જુરેકા
  વિશ્વે ભૂમ્નીતિ દૃષ્ટે જગદિતિ ન તથા કથ્યતે બ્રહ્મમાત્રમ્ ।
સત્તા સામાન્યરૂપાત્કથિત ઇતિ ચ યો દૃશ્યરૂપો ન તાદૃક્
  દૃશ્યં યદ્વિઘ્નકૃત્સ્યાત્તદપનયનતો વિઘ્નહાઽયં સ્વબોધાત્ ॥ ૩॥

ભાત્યસ્ત્યાનન્દરૂપો વિલસતિ ચ સદા દુઃખજાડ્યાનૃતેષુ
  નિત્યો નિત્યાદિકાનાં ભવતિ ચ નનુ યશ્ચેતનશ્ચેતનાનામ્ ।
દૃશ્યસ્યૈતસ્ય માયાકૃત સુખમિહ યત્પ્રાર્થ્યતે તદ્ગણેશો
  યસ્તં સર્વાદિભૂતં ભજત જગતિ ભો સારભૂતં વરેણ્યમ્ ॥ ૪॥

શ્રુત્યા યન્નિર્વિકારં નિરતિશયસુખં બ્રહ્મતન્મત્સ્વરૂપં
  જ્ઞાત્વા નિત્યં હિ ભૂત્વા સકલમપનયન્સ્વાર્ચિષા સ્વસ્થિતોઽહમ્ ।
માયા તત્કાર્યમેતત્સ્પૃશતિ ન મયિ વા બાધતે તત્કથઞ્ચિત્
  માયાયાઃ સર્વશક્તેઃ પર ઇતિ સતતં યઃ સ એવાદ્વયોઽહમ્ ॥ ૫॥

ઇતિ શ્રીમત્ પરમહંસ પરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવતા
શ્રીધરસ્વામિના વિરચિતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ।
(રચનાકાલઃ - આષાઢ ૧૮૮૭)

Proofread by Paresh Panditrao

*Ganesha Stotram*
pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*